# shrIvyAghrAlayeshashatakam

# શ્રીવ્યાઘ્રાલયેશશતકમ્

## Document Information

Text title : Vyaghralayesha Shatakam 06 33

File name : vyAghrAlayeshashatakam.itx

Category : shiva, shataka

Location : doc_shiva

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-33

Latest update : September 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીવ્યાઘ્રાલયેશશતકમ્

ચિત્રં કાલસ્ય શક્ત્યા પ્રશિથિલભુવનૈશ્ચર્યભૂમ્ના સમિન્ધે-
યત્ર ત્રૈલોક્યનાથઃ પથિ પથિકજનારાધનાર્થં કપાલી ।
પુત્રઃ શ્રીષણ્મુખશ્ચોત્તરભુવિ ભગવાન્ વાસુદેવશ્ચ શૈવં
સત્રં કિં વર્ણ્યતે તચ્છિવશિવ શિવલોકાયતે વ્યગ્રદેશઃ ॥ ૧॥

સઙ્કેતે યોજનાભિસ્તિસૃભિરભિમિતે શઙ્કરસ્ય પ્રસિદ્ધે
સન્ત્યદ્યાપિ પ્રતિષ્ઠાઃ શતમખહરમષ્ટોત્તરં દેવતાનામ્ ।
સઙ્ખ્યા નાસ્તિ દ્વિજાનાં સદનમિહ સહસ્રાધિકં યત્ર સર્વે
સન્તુષ્યન્ત્યાશુ તં દ્રાગખિલભયહરં વ્યાઘ્રદેશં પ્રપદ્યે ॥ ૨॥

આસ્તાઞ્ચોરારિરાજગ્રહપરિભવભીરન્તકસ્યાપ્યશઙ્કં
શાસ્તા યત્રાસ્તિ સંવત્સરભજનમૃતે મણ્ડલેનાપિ ચિત્રમ્ ।
ભક્તાનાં ભુક્તિમુક્તી વિતરતિ ભગવાનાશુતોષ્યસ્તમેતં
ભક્ત્યા વૈયાઘ્રદેશં વયમપિ શરણં પ્રાપ્નુમો વાઞ્છિતાપ્ત્યૈ ॥ ૩॥

શિષ્ટા યં યાન્તિ દિશ્યઃ દિગ્ભ્યઃ સ્વયમપિ ચ યતો હન્ત ધાવન્તિ દિષ્ટ્યા
દુષ્ટાઃ સર્વેઽપિ તસ્માદભયદમનિશં વ્યાઘ્રદેશં શરણ્યમ્ ।
પુષ્ટં સમ્પ્રાપ્ય શમ્ભું શરણમુપગતોઽસ્મીશ્વરસ્ય પ્રસાદાત્
કષ્ટે કાલેઽપ્યકસ્માત્ કલયતિ કરુણાં કેષુચિત્ કામવૈરી ॥ ૪॥

વન્દે વર્ણાનશેષાન્ પરતરભગવદ્ ગ્રામગાનાશ્રમાન્ વા
વન્દ્યાન ભક્તાનભક્તાનજમૃગગજગોપક્ષિસર્પાદિજન્તૂન્ ।
પુણ્યાનપ્યગ્રહારાનખિલમઠગણાનાપણાન્ વૃક્ષપઙ્ક્તિં
તૃણ્યાં ચ વ્યાઘ્રગેહત્રિનયનકૃતસાન્નિધ્યસઙ્કેતરૂઢામ્ ॥ ૫॥

મા ભૂન્મે જન્મભૂમૌ મમ યદિ મરણાનન્તરં વ્યાઘ્રદેશે
શોભાતોતત્રિલોકે ભવતુ ભગવતો ધામ્નિ માનુષ્યમાસ્તામ્ ।
જીવોઽયં જઙ્ગમત્વેઽપ્યનતિરતિરિહ સ્થાવરત્વેઽપિ જનન્મી
દેવૈરપ્યર્ચ્યતે તદ્વિદુરજવિદુરવ્યાસવાલ્મીકિમુખ્યાઃ ॥ ૬॥

પષ્યામ્યન્તઃ પવિત્રં પરમપશુપતિસ્થાનમાનન્દ ભૂમ્ના
વિશ્વં વિસ્મૃત્ય લીયે વિમલતરપરબ્રહ્મસાયુજ્યસૌખ્યે ।
નશ્યત્રાયે સમાધૌ નગવરતનયાવલ્લભે ભક્તિમૈત્રી-
વિશ્વાસાન્ પ્રાર્થયે પ્રાઞ્જલિરહમનિશં વ્યાઘ્રગેહેશ ઈશે ॥ ૭॥

યત્ર ત્રૈલોક્યનાથત્રિનયનભગવન્નિત્યસાન્નિધ્યયોગાત્
સત્રં સાન્દ્રં સમસ્તાસ્સુરસુરમુનયો માનુષીભૂય યાત્વા ।
ધન્યૈઃ સર્વૈર્મનુશ્યૈઃ સહચરભજનં કુર્વતે સર્વલોકાઃ
મન્યે યાન્તીશ્વરસ્યોદર ઇવ સતતં વ્યાઘ્રગેહે ચ ચિત્રમ્ ॥ ૮॥

બ્રહ્મણ્યાસ્તિક્યસત્યાર્જવવિનયદયૌદાર્યદાક્ષિણ્યભાજાં
સામ્યોનસ્થાનમાનસ્વજનધનવતાં વ્યાઘ્રદેશદ્વિજાનામ્ ।
યોગો યોગ્યેઽત્ર પાત્રે કલયતુ કરુણામર્થિને નીવૃદન્ત-
ર્ભાગે ભાગ્યૈકલભ્યે દિશતુ ચ શરણં નીલકણ્ઠોપકણ્ઠે ॥ ૯॥

યોગે યઃ સજ્જનાનાં ત્રિજગતિ મહતાં વ્યાઘ્રદેશદ્વિજાનાં
યોગે યઃ સમ્યગિન્ધે રજનિકર ઇવ વ્યોમદેશદ્વિજાનામ્ ।
ભાગેનેશો યદાત્મા ભવતિ સ ભગવત્કાર્યકર્તૈહિકાન્ મે
ભોગાન્ પુષ્ણાતુ શોણાચલનિલયમહાદેવદેશદ્વિજન્મા ॥ ૧૦॥

ભસ્મવ્યાલિપ્તભક્તાવલિપરિકલિતસ્નાનપાનાદિપૂતે
યસ્મિન્ સ્નાતા નરૌઘા યમપુરગમનં યાતનાદ્યં ચ હિત્વા ।
સેવન્તે વ્યાઘ્રગેહાધિપપરમશિવં પ્રાપ્ય સારૂપ્યવન્તો
દેવન્તે તત્ર નિત્યં ભવતુ ભવતટાકોત્તમે મજ્જનં મે ॥ ૧૧॥

વિશ્વવ્યાપ્તં વિરિશ્ચાદિભિરપિ વિચિતં તત્ત્વમત્યન્તશુદ્ધં
શશ્વચ્છાન્તં શશાઙ્કાઙ્કિતમતિધવલં દૃષ્ટવાન્યસ્ય મૂલે ।
વિશ્વામિત્રપ્રભાવઃ શિવ શિવ ભગવાન્ વ્યાઘ્રપાદઃ સ ભાસ્વઃ
નશ્વત્થોઽસ્માકમંહો હરતુ હરિહરબ્રહ્મમુખ્યામરાત્મા ॥ ૧૨॥

યચ્છાયા પાદભાજાં હરતિ ભવપરીતાપમધ્વશ્રમાન્તં
તુચ્છો વૃક્ષસ્તુષારો મરુદપિ કુરુતે યસ્ય વેદિં પવિત્રામ્ ।
અચ્છામારુહ્ય લોકસ્ત્યજતિ પરમધઃપાતશઙ્કાં સ મુક્ત્યા-
મિચ્છામીશસ્ય શાખી દિશતુ મમ મહાન્ વ્યાઘ્રગેહાન્તગાહી ॥ ૧૩॥

મૂલં પાતાલલોકે મુનિભિરપિ નુતં સત્યલોકે કિલાગ્રં

ભૂલોકે મધ્યમાત્રં મણિકટકદૃઢં દૃશ્યતે યસ્ય પીનમ્ ।
સેવારોહાવરોહાનસુરસુરજના યેન તન્વન્તિ મન્યે
દેવસ્ય વ્યાઘ્રગેહે બહિરુપનિહિતં ચિન્તયન્તં ધ્વજેન્દ્રમ્ ॥ ૧૪॥

સ્થૂલં તુઙ્ગ ગભીરં પરિકલિતમહાવેદિમૂલં પતાકા-
માલાભિઃ કિઙ્કિણીભિર્મણિમયકટકૈઃ કઙ્કણૈશ્ચોલ્લસન્તમ્ ।
તાલાકારં કઠોરં વૃષભપરિવૃઢેનાઙ્કિતં કાકુટીકં
વ્યાલોક્યં વ્યાઘ્રગેહે બહિરુપનિહિતં ભાવયે કેતુદણ્ડમ્ ॥ ૧૫॥

શિષ્ટાનિષ્ટાતિદુષ્ટાસુરરુધિરઝરી તુન્દિલા તુઙ્ગદંષ્ટ્રા
તુષ્ટા રુષ્ટાટ્ટહાસત્રુટિતવિધિકટાહોદરોદારવીર્યા ।
તિષ્ઠન્તી તિન્દુકાધોભુવિ ભુજધૃતનાનાયુધા ભદ્રકાલી
(તિન્દુકઃ કશ્ચિત્ વૃક્ષવિશેષઃ)
કષ્ટં તીવ્રં કલિં નઃ શમયતુ વિશદં વ્યાઘ્રદેશેશકન્યા ॥ ૧૬॥

ભદ્રાન્ ભર્ગસ્ય ભક્તાન ભસિતસિતજટાભસ્મરુદ્રાક્ષમાલા
જાલાલઙ્કારકાન્તાનભિનવપરિધાનોત્તરીયાભિરામાન્ ।
દન્તશ્રીભિર્દિગન્તાનપિ ધવલયતઃ સન્તતં વ્યાઘ્રપુર્યા-
મન્તર્ભૂતાનનન્તાનહમનુકલયે પાવનાન્ પાપશાન્ત્યૈ ॥ ૧૭॥

પ્રાદક્ષિણ્યાનિશામ્રેડિભિરતિનિબિડર્જઙ્ગમાનેકપઙ્ક્તિ
પ્રાકારભ્રાન્તિરીશાઙ્ગણભુવિ મિષતાં તન્યતે યૈર્જનાનામ્ ।
પ્રાતઃ પ્રારભ્ય શશ્વત્પ્રગુણિતભગવન્નામસઙ્કીર્તનાઢ્યાન્
પ્રાજ્ઞાન્ વ્યાઘ્રાલયાધીશ્વરભજનજનાન્ પ્રાઞ્જલીન્ ભાવયે તાન્ ॥ ૧૮॥

દિવ્યા દીપા યદીયા દિવિ ભુવિ ભુવને ભોગિનાં ચાન્ધકારં
પ્રવ્યામં દ્રાવયન્તિ પ્રબલતમમલં બાહ્યમાભ્યન્તરં ચ ।
નવ્યા નાનાશ્મક્લૃપ્તા નયનપથનભોનાકલોકાતિગા સા
ભવ્યાય વ્યાઘ્રગેહામ્બરવરસહજા વેદિકા નોઽસ્તુ નિત્યમ્ ॥ ૧૯॥

કાલારેઃ કાર્યકારાઃ શિવ શિવ કરદા વાવનીન્દ્રાશ્ચ કાલે
કાલે નિત્યાન્નદાનોત્સવનિયમવિધેઃ સર્વસમ્ભારજાતમ્ ।
ભૂલોકાત્ કૃત્સ્નતોઽસ્માદનવધિમનુજૈરાહરન્તીહ યસ્યાં
સ્થૂલાકારાતુલા સા લસતુ મમ હૃદિ વ્યાઘ્રગેહાપગ્રશાલા ॥ ૨૦॥

રાજ્ઞાં કૈઙ્કર્યમાસ્તામમરપરિવૃઢા શઙ્કરાજ્ઞાકરત્વાત્
પ્રાપ્ય પ્રાયો યતન્તે યજનસદનતશ્ચાતિપૂતે યદન્તે ।

શક્રઃ સર્વજ્ઞુષોઽગ્નિઃ પચતિ પટુતરં વાતિ વાયુર્યથેષ્ટં
    પાથઃ સૂતેઽમ્બુપાલો લસતુ મન હૃદિ વ્યાઘ્રગેહાયશાલા ॥ ૨૧॥

અન્યેષાં સક્તિરાસ્તામતિરજતગિરીનન્નશૈલાનસઙ્ખથા
    નક્ષાયૈવોપદંશાનપિ વિરચયતો યસ્થ વક્ષ્યાદ્યપેક્ષા ।
મન્યે મર્ત્યત્વસિદ્ધ્યૈ ભવતુ ભગવતો વ્યાઘ્રગેહાગ્રશાલા
    ધન્યા યત્પાદધૂલ્યા ધરણિરપિ નમો ભૂમિદેવાય તસ્મૈ ॥ ૨૨॥

યાતાયાતત્રિલોકીજનજનિતજગત્કુડ્યકુટ્ટાકઘુષ્ટયા
    પ્રાતઃ સાયં સદાપિ પ્રબલબહુલકોલાહલૈર્યત્ર નિત્યમ્ ।
મધ્યાહ્ને માન્યવર્ણાર્ણવમણિમકુટાન્યન્યવર્ણાર્ણવેભ્યો
    વર્ધન્તે વ્યાઘ્રગેહામ્બરવરમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૨૩॥

વિપ્રાઃ કત્યસ્તસઙ્ખ્યા અપિ ભુવિ વિબુધાશ્ચાવતીર્ય દ્વિજત્વં
    બિભ્રાણા યત્ર શઙ્કે સહ સકલમહીદેવસઙ્ઘેન ભુક્ત્વા ।
ભુક્તીચ્છાભૂમનિત્યક્ષતનિજયજનાંશામૃતેચ્છા ભવન્તિ-
    વ્યક્તં વૈયાઘ્રગેહામ્બરવરમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૨૪॥

ભક્તઃ શ્રીબિલ્વમાઙ્ગલ્યક યૈતિ ભગવાન્ ભક્તિસાક્ષાત્કૃતશ્રી-
    કૃષ્ણઃ કૃત્સ્નઃ પ્રદેશં શિવશિવજટિલં વીક્ષ્ય દેહેન ગેહમ્ ।
ગત્વા ગૌરીશમશ્રુ દ્વિજજનવનગં યત્ર દૃષ્ટ્વા સજઙ્ઘિં
    ચક્રે વૈયાઘ્રગેહામ્બરવરમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૨૫॥

બ્રહ્મક્ષત્રાર્યશૂદ્રાદ્યનવધિજનતાભુક્તભૂયિષ્ઠભિસ્સા
    શિષ્ટોચ્છિષ્ટાન્નસમ્ભાવિતસકલચરસ્થાવરાત્મપ્રપઞ્ચમ્ ।
બ્રહ્મજ્યોતિઃસ્વરૂપં યદખિલમનઘં શુદ્ધ્યશુદ્ધી ન યસ્મિન્
    સમ્યગ્વૈયાઘ્રગેહામ્બરવરમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૨૬॥

ઇન્દ્રાદ્યા લોકપાલા પ્રતિદિશમધિકારાસ્પદભ્રંશભીત્યા
    તન્દ્રાં ત્યક્ત્વા તપસ્યાં વિદધતિ હિમવાતાતપાસારસાહાઃ ।
ચન્દ્રાપીડસ્ય વિષ્વગ્બહુલબલિશિલાત્મના યત્ર નિત્યં રૂપતાં પ્રાપ્ય યત્ર
    સન્દ્રષ્ટવ્યં તદાભ્યન્તરમજિરમવેદ્ વ્યાઘ્રગેહેશિતુર્મામ્ ॥ ૨૭॥

સ્તમ્ભૌઘૈઃ શાતકૌમ્ભૈઃ શમનજિદભિષેકામ્બુકુમ્ભૈરસઙ્ખ્યૈઃ
    શુમ્ભન્તં શમ્ભુભક્તૈર્વિગતભવભયૈર્વીતડમ્ભૈર્વિભાન્તમ્ ।
કુમ્ભિન્યાધારમમ્ભોધરસરણિરુધં સમ્ભૃતાભોગયોગં
    ગમ્ભીરં વ્યાઘ્રગેહાત્રિપુરહરમહામણ્ડપં ગન્તુમીહે ॥ ૨૮॥

શ્રીમદ્રામાયણ ભાગવતમપિ મહાભારતં સેતિહાસં
    ધીમત્સઙ્ઘૈઃ પુરાણં સકલમપિ સદા પઠ્યતે યત્ર નિત્યમ્ ।
સામાદ્યામ્નાયમન્ત્રવ્રજજપભગવન્નામગાનાદિમન્તં
    સામોદં વ્યાઘ્રગેહત્રિપુરહરમહામણ્ડપં ચિન્તયે તમ્ ॥ ૨૯॥

ભાટ્ટપ્રાભાકરવ્યાકરણવિધિભિર્વેદવેદાન્તચિન્તા
    ભામ્ભિર્ભટ્ટારકૌઘૈરમિતમખિશતૈઃ શાસ્ત્રિભટ્ટૈશ્ચ ભાન્તમ્ ।
પ્રેષ્ઠું ઇ સાષ્ટાઙ્ગયોગાભ્યસનકૃતધિયાં પ્રૌઢયોગીશ્વરાણાં
    પ્રેમ્ણા વૈયાઘ્રગેહત્રિપુરહરમહામણ્ડપં ભાવયેઽહમ્ ॥ ૩૦॥

કૈલાસં કાશિકા દુસ્ત્યજમસુરપતેર્ગોપુરં ભૂયસા કિં
    લોક્યાન્તર્ગતાન્યસ્થલકુલમખિલં પ્રોજ્ય ઝ્ઝપ સર્વાત્મનાયમ્ ।
શૈલાપત્યસ્ય ભર્તા ભજતિ સવિરગો બ્રહ્મઘોષેણ મન્યે
    શૈવોઽહં વ્યાઘ્રગેહત્રિપુરહરમહામણ્ડપં ભાવયે તમ્ ॥ ૩૧॥

વિન્યસ્તાશ્વત્થદીપદ્વિતયવિલસિતં વીતમાયાવિરોધં-
    સંન્યાસિસ્તોમસાન્દ્રં સનકમુખમુનિવ્રાતસઞ્ચિન્ત્યમાનમ્ ।
મન્યે વૈયાઘ્રગેહત્રિપુરહમહામણ્ડપં મણ્ડપાનાં
    ધન્યં ધર્માર્થકામાદ્યવિરલપુરુષાર્થપ્રદં પૂજયેઽહમ્ ॥ ૩૨॥

ધામ્નો ધાવલ્યવૃદ્ધ્યા ધવલિતભુવનં સ્થૂલતાતુઙ્ગતાભ્યાં
    સ્થેમ્ના ચાણૂકૃતાદ્રીશ્વરમતુલકકુત્પુચ્છશૃઙ્ગાસ્યનાસમ્ ।
ભૂમ્ના વૈયાઘ્રગેહત્રિપુરહરમહામણ્ડપે ભાસમાનં
    નામ્ના નન્દીતિ ગીતં નયનસુખકરં વૃદ્ધમીડે વૃષેન્દ્રમ્ ॥ ૩૩॥

રુદ્રં યદ્રૂપધારી વહતિ હરિરશેષાણ્ડમાણ્ડૈકધુર્યં
    ક્ષુદ્રૈરન્યૈરધાર્યં હરમુપરિ કથં કુર્યુરૈરાવતાદ્યાઃ ।
શક્તઃ સિંહોઽપિ ગૌરીં શરણમુપયયાવેવ કિં ભૂયસા તં
    વ્યક્તં વ્યાઘ્રાલયાધીશ્વરવૃષવપુષં ભાવયે વાસુદેવમ્ ॥ ૩૪॥

યાસ્યૈકસ્યૈવ હીહ ત્રિજગતિ સુમહત્યગ્રપૂજા તદાસ્તા-
    મસ્મિન્વૈયાઘ્રગેહે નિખિલજનમહાતૃપ્તિકૃત્યન્નવૃષ્ટ્યામ્ ।
દસ્યુષ્વપ્યત્ર ભાવાદનુદિનમધિકં શિષ્યયત્તદન્નમ્ ।
    યસિન્ધું યાતિ મન્યે સતતમપિ નમો વિઘ્નરાજાય તસ્મૈ ॥ ૩૫॥

મન્થાગ્રં દધ્યમત્રાદિવ કનકમયં યસ્ય રૂપી વરાગ્રં

હન્ત બ્રહ્માણ્ડભાણ્ડાત્ બહિરુપરિ મુદા દૃશ્યતે મુક્તભક્તૈઃ ।
મન્તવ્યો મધ્યભાગઃ સુરનરસુખદો મૂલદેશોઽસુરૌઘં
હન્તિ શ્રીવ્યાઘ્રગેહોદરગૃહમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૩૬॥

નિષ્ઠાપાત્યુજ્જ્વલાષ્ટાપદમયમખિલં ભાતિ યદ્યસ્ય દિવ્યો
દિષ્ટયાસ્યાં વિષ્ટપાણ્ડોદરભુવિ ઘટદીપાયતે દીપ્તિભૂમા ।
મૃષ્ટાનાં યન્મષીનાં દ્યુતિતતિભિરિનો યાતિ ખદ્યોતભાવં
દ્રષ્ટવ્યં વ્યાઘ્રગેહોદરગૃહમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૩૭॥

શ્રદ્ધાલૂનાં નૃણાં યચ્છ્રવણમનનસન્દર્શનાદ્યૈરઘૌઘં
દગ્ધ્વાશૂત્પાદ્ય ભક્તિં ભવમપિ હૃદયે ભાવયિત્વાત્મસામ્યમ્ ।
દત્તે દેવાલયોઘૈરવનિતલગતૈરર્ચનીયં જનાનાં
સ્મર્તવ્યં વ્યાઘ્રગેહોદરગૃહમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૩૮॥

દ્વીપત્વં દિવ્યસેવારવરતભગવદ્ભક્તપાથોધિમધ્યે
દીપત્વં ભક્તિભાજાં મનસિ ચ ભજતે ભાવનીયં યદૈશમ્ ।
ગોપાનસ્યાતિગુપ્તં ગુરુગુણસુજનં ક્રાન્તસોપાનમન્તં
તાપાનાં વ્યાઘ્રગેહોદરગૃહમનિશં નસ્તદન્તઃ સમિન્ધામ્ ॥ ૩૯॥

પારં પશ્યામિ નાહં પરમશિવાપદાભ્યન્તરાગારરત્ન
દ્વારે સોપાનપાર્શ્વદ્વિતયમિતવતાં ભક્તપારાવરાણામ્ ।
દારૂર્મ્યાધ્માતઘણ્ટાઘણઘણરણિતાઘોષપુષ્યેષુ તેષાં
પૂરે વૈયાઘ્રગેહાધિપપુરુકૃપયા વિન્દુભાવં વહેયમ્ ॥ ૪૦॥

પીનાવિચ્છિન્નઘણ્ટાઘણરણિતામ્રેડનાજેલ્યભિખ્યા
ગાનાનન્દો દ યાભ્યુચ્ચરિતજયનમોનાદવાનાન્યઘોષૈઃ ।
નાનાભટ્ટાદિભક્તૈરવિરતનિબિડં નીલકણ્ઠાલયાગ્ર-
સ્થાનં વૈયાઘ્રગેહોદરગતમનિશં માનસે નઃ સમિન્ધામ્ ॥ ૪૧॥

નૃત્તૈર્ગી તૈશ્ચ વાદ્યધ્વનિભિરપિ જગન્મોહનૈર્દેહિનો યે
નિત્યં વ્યાઘ્રાલયેશં શમનરિપુમહોરાત્રમારાધયન્તે ।
તેષાં તૌર્યત્રિકં નઃ શમયતુ શમલં શશ્વદન્તર્મહાન્તં
તોષં પુષ્ણાતુ ચોપર્યુપરિ પુરુપરબ્રહ્મસમ્મોદકલ્પમ્ ॥ ૪૨॥

સમ્યગ્વૈયાઘ્રગેહાધિપપદમખિલં શોધયન્તીહ ભક્ત્યા
સમ્માર્જન્યમ્બુગોવિટ્પ્રભૃતિભિરપિ યે કર્મ યેષામકામમ્ ।
સન્માનુષ્યૈકસાધ્યં મુનિભિરપિ મુહુઃ શ્લાઘ્યતે મુક્તિમૂલં

સન્માર્ગસ્થાનહન્તાનઘશતશમનાયાનહન્તાનુપાસ્યે ॥ ૪૩॥

નિર્માયં વ્યાઘ્રગેહોદરગતભગવદ્ગર્ભગેહં ગભીરં
બ્રહ્માદ્યૈરપ્યગમ્યં બહુમતમિહ યે સમ્પ્રવિશ્યાનુવેલમ્ ।
નિર્માલ્યૌઘં નિરસ્ય સ્વયમમલજલૈઃ શોધયન્તે વયં તાન્ ।
બ્રહ્મપ્રાયાન્ પ્રયામઃ શરણમશરણાશ્ચન્દ્રચૂડદ્વિજેન્દ્રાન્ ॥ ૪૪॥

માલ્યં પુષ્પં ચ પૂતં પુરુપુરરિપવે દીયતે યૈરમૂલ્યં
કાલ્યાદિષ્વત્ર કાલેષ્વનુદિનમતુલં યેષુ દૈવાનુકૂલ્યમ્ ।
પાલ્યા વૈયાઘ્રગેહાધિપપરમશિવોદયાનવાટીહ યૈસ્તાન્
બાલ્યાદારભ્ય ભક્ત્યા કૃતબહુસુકૃતાન્ માલિકાન્ માનયે તાન્ ॥ ૪૫॥

ભક્ત્યા ભર્ગાદવાપ્તં શબલતુલસિકાશઙ્ખગઙ્ગાપગામ્ભો
ભસ્માદિવ્યાજભાજં ભવભયભિદુરં ભાસુરં ભૂસુરા યે ।
ભક્તૌઘેભ્યઃ પ્રસાદં દદતિ ભગવતો વ્યાઘ્રમેહસ્થગૌરી-
ભર્તુર્ગર્ભાલયસ્થાન્ ભવહૃદયવિદો દેવલાન્ ભાવયે તાન્ ॥ ૪૬॥

સન્ત્વન્યે દેવલા યે ભુવિ ભુવનભરાઃ કેવલં સ્વાર્થતન્ત્રૈઃ
કિં તૈઃ કાર્યં જનાનાં જગદુપકૃતયે યત્સ્વરૂપેણ દિષ્ટ્યા ।
હન્ત શ્રીશઙ્કરોઽવાતરદિહ કૃપયા શઙ્કરાખ્યોઽનુકમ્પા-
સિન્ધુઃ સ વ્યાઘ્રગેહાધિપ ઇવ દયતે દેવલાદ્યોઽતિથીનામ્ ॥ ૪૭॥

સ્થૂલં વૈયાઘ્રગેદ્યુતિતતિતતયે નાલમેતત્ત્રિલોકં
ભૂલોકે તચ્ચ દિવ્યામ્બરવરમનલં ગર્ભગેહાંશુભૂમ્ને ।
ગર્ભાગારં તદન્તર્ગતમણિમહસાં ગર્વિતાનાં પ્રકાશં
ગર્ભે ધત્તે કથઞ્ચિત્ શિવ શિવ ભગવત્પ્રાભવપ્રૌઢિભૂમા ॥ ૪૮॥

સન્ધ્યા રાત્રિઃ પ્રભાતં દિનમપિ સકલં યત્ર સામ્યં ભજન્તે
વન્ધ્યાઃ કાલસ્ય ભેદાવરમણિમયતા વઞ્ચિતોદઞ્ચિતાભાઃ ।
સન્ધ્યાદાનેન દીપા વિદધતિ વિવિધા યત્ર રત્નાતપૌષ્ણ્યં
તં ધ્યેયં વ્યાઘ્રગેહેશિતુરનુકલયે ગર્ભગેહસ્ય ગર્ભમ્ ॥ ૪૯॥

કિં દીપૈઃ કિં મણીન્દ્રૈઃ કિરણિભિરિહ કિં કિઙ્કરીભૂતવદ્ભિઃ
કિં દા ગ્લા નૈરિન્દુસૂર્યાદિભિરપિ સુષમાકન્દલીસુન્દરાઙ્ગમ્ ।
સન્દીપ્તં તુલ્યકાલોદિતતુહિનકરરાદિત્યકોટિપ્રકાશં
મન્દીકુર્યાન્મહોઽસ્મન્મતિતિમિરભરં વ્યાઘ્રગેહસ્થમૈશમ્ ॥ ૫૦॥

કિં ભૂમ્ના ભારતીનાં ભવતુ ભગવતો વ્યાઘ્રગેહેશિતુઃ શ્રી-
શમ્ભોઃ પાદારવિન્દદ્વિતયતલયુગે ભક્તિરસ્માકમગ્રયા ।
સમ્ભાવ્યં ભાવ્યતેઽમ્ભોરુહનયનમુખૈરીશ્વરૈરન્તરઙ્ગે
ગમ્ભીરે યદ્ગભસ્તિપ્રતિહતગરુડભ્રાતૃકોટિપ્રકાશમ્ ॥ ૫૧॥

લીયન્તે યત્ર મુક્તા મુહુરહહ મુદા યત્ર લીના ન ભૂયો
જાયન્તે યત્સિતાનપ્યરુણયતિ નખાનાત્મરામાભિવૃદ્ધ્યા ।
વ્યક્તૈઃ શ્રીશઙ્ખચક્રાઙ્કુશકલશસરોજાદિરેખાસહસ્રૈ
ર્યુક્તં તદ્વ્યાઘ્રગેહાધિપપદતલયોર્યુગ્મમવ્યાત્ સદાસ્માન્ ॥ ૫૨॥

ઇન્દ્રોપેન્દ્રાદિવૃન્દારકનિકરકિરીટાગ્રરત્નારુણાના-
મિન્દુપ્રાયત્વદા યે નતિષુ સુષમયા સુન્દરાસ્તે મમાન્ધ્યમ્ ।
સન્દ્રાવ્ય વ્યાઘ્રગેહેશ્વરચરણનખાઃ સન્તતં ભાન્તુ ભાસાં
સન્દોહેન પ્રદીપા ઇવ હૃદિ મહિતસ્નેહયોગેન હૃદ્યે ॥ ૫૩॥

ધન્યૈર્ધાર્યં ધિયૈકં પ્રપદમહિવરાધારભૂતાદિકૂર્મં
મન્યે પાદાગ્રમન્યન્મહદતિસુભગં મન્દરોદ્ધારકૂર્મમ્ ।
હન્યેતે યન્ન મુક્તિઃ કથમુપરિ ન ચેત્તદ્ દ્વયી જહ્નુભૂભૃત્-
કન્યાઢ્યં વિશ્વભારૈરધિતમિહ બિભૃયાદ્વ્યાઘ્રગેહેશદેહમ્ ॥ ૫૪॥

શઙ્કે વૈયાઘ્રગેહપ્રભવિતુરતુલે શઙ્કરસ્યાભિજાતે-
જઙ્ઘેપઙ્કેરુહેષોરિષુધિયુગકૃતૌ માતૃકે પ્રાગભૂતામ્ ।
ન્યાઙ્કાદક્ષાય ભસ્મીકૃતવતિ ભગવત્યઙ્ગજં ભગ્નવાઞ્છા- ।
સઙ્ઘાયઙ્કાધિરૂઢા ભજતિ ભવમુમા યદ્ભયાત્મસ્મરાર્ત્યા ॥ ૫૫॥

જાનેઽહં વ્યાઘ્રઙ્ગેહેશિતુરલમતુલે જાનુની જહ્નુકન્યા
જાનેરાનન્દમૂર્તેરખિલમુનિમનોમૌક્તિકાનાં સમુદ્ગૌ ।
પીનાવઙ્કૌ ચ ચીનાંશુકપરિપિહિતૌ નૌમિ તત્રાપિ માન્ય-
સ્થાનં વન્દે ભવાન્યાઃ પરમમનુપમં વામમઙ્કુ વિશેષાત્ ॥ ૫૬॥

નગ્નં કેચિત્કિલાહુઃ કનકવસનિનં કેચનાન્યેઽદ્રિકન્યા-
મગ્નં શાર્દૂલચર્મામ્બરમપરે દન્તિચર્માન્તરીયમ્ ।
ભગ્નારિં વ્યાઘ્રગેહેશ્વરમભિદધતે ભાષણં ભક્તિભાજા
મગ્નીન્દ્વાદિત્યનેત્રો વિતથમપિ વિભુર્ભૂષણં વેત્તિ મન્યે ॥ ૫૭॥

કારુણ્યાભીષ્ટપટ્ટામ્બરપરિકલિતસ્વર્ણકાઞ્ચ્યઞ્ચિતં વા
કારુણ્યોપાત્તકાકર્કોટકકલિતકરિત્વગ્વરાલઙ્કૃતં વા ।

સારોદારોરુસર્પાન્તરદૃઢઘટિતવ્યાઘ્રચર્માંમ્બરં વા
    સારોગ્યં વ્યાઘ્રગેહાધિપતિકટિતટં ચિન્તયે ચિત્તશુદ્ધ્યૈ ॥ ૫૮॥

અન્તઃસ્થાનન્તકોટિત્રિભુવનકૃતયા કાર્શ્યવિશ્લેષભીત્યા
    સન્ધ્યર્થં ધાર્યતે યઃ સદુદરનહનવ્યાજભાજા હિ ભર્ત્રા ।
હન્ત શ્રીનાભિરોમાવલિવલિવિલસન્ વિશ્વવોહા દ્વા પિ યો વા
    વન્ધ્યાપુત્રાયતે તં સ્મરતુ મમ મતિર્વ્યાઘ્રગેહેશમધ્યમ્ ॥ ૫૯॥

હારં હારાહિમાલાપરિવૃતવનમાલાસ્થિમાલાદિમાલા-
    ધારં ધારાધિકાક્તં વિલસિતભસિતોદ્ધૂલિતં ધૂસરાભમ્ ।
વારં વારં વરોરઃસ્થલમખિલમહાપાપપાથોધિપોતં
    સ્મારં સ્મારં સ્મરારિં ભજતુ મમ મતિર્વ્યાઘ્રગેહેશિતારમ્ ॥ ૬૦॥

ગૌર્યા ગાઢાઙ્કપાલીપિશુનમતિશુભં ભસ્મ યસ્માદવાપ્તં
    ગૌરાભં કુઙ્કુમાઙ્કં કઠિનકુચતટે તારહારાદિરમ્યે ।
દિવ્યેભ્યો ભૂષણેભ્યોઽપ્યતિશયસુભગં ભાવ્યતે માં પુનીતા-
    મવ્યાજં વ્યાઘ્રગેહત્રિપુરહરમહોરઃસ્થલં તદ્વિશાલમ્ ॥ ૬૧॥

સ્થૂલસ્થૂણર્દ્ધિકૂલઙ્કષઘનસુષમાનાયતાનાત્તશુમ્ભ-
    ચ્છૂલશ્રેષ્ઠાસિટઙ્કાભયવરમૃગરુદ્રાક્ષભિક્ષાકપાલાન્ ।
લોલાઁલ્લોકૈકપાલાનહિકટકધરાનાકૃતાસ્થ્યઙ્ગુલીયાન્
    વ્યાલોકેઽન્તર્બલિષ્ઠાન્ વ્યયજિતબહુદાન્ વ્યાઘ્રગેહેશબાહૂન્ ॥ ૬૨॥

ક્ષીરાબ્ધેઃ સર્વદેવાસુરવરમથિતાદુત્થિતાન્યદ્ભુતાનિ
    સ્ત્રીરત્નાદીનિ તૈસ્તૈરહમહમિકયા સ્વીકૃતાનિ ત્રિલોકીમ્ ।
ભસ્મીકર્તું સમર્થં સરભસમુદિતં ક્ષ્વેલમદ્યાપિ દેવો
    યસ્મિન્ ધૃત્વાવતીદં જગદવતુ સ માં વ્યાઘ્રગેહેશકણ્ઠઃ ॥ ૬૩॥

હન્ત શ્રીકણ્ઠકાષ્ણ્યોંદયમધિકમધઃકૃત્ય ધાવલ્યમગ્ર્યં
    દન્તશ્રીસન્તતીનાં તિરયતિ નિતરાં યોઽરુણિમ્નાં મહિમ્ના ।
ગન્ધર્વાર્ચ્યામ્બિકા યદ્ધતમમૃતરસં સમ્યગાપીય ગઙ્ગા-
    ગન્ધાયાપ્યભ્યસૂયત્યલમવતુ સ માં વ્યાઘ્રગેહેશ્વરોષ્ઠઃ ॥ ૬૪॥

કર્ણૌ સત્કુણ્ડલિભ્યાં વિરચિતવિલસત્કુણ્ડલૌ કાન્તિદાનૈઃ-
    કર્ણૌ કાનીનતોઽન્યૌ કપિલસિતકપોલસ્થલાદર્શબિમ્બે ।
બિબ્વોકં બિમ્બિતત્વાત્ કમપિ વિદધતૌ કમ્રબિમ્બાધરશ્રી-
    સમ્બન્ધાવ્યાઘ્રગેહેશિતુરતિસુભગૌ સન્તતં ચિન્તયેઽહમ્ ॥ ૬૫॥

વ્યાસાદ્યૈઃ કાલિદાસાદિભિરપિ કવિભિર્વર્ણિતા કર્ણપૂર-
વ્યાસક્ત્યાસન્નભાસ્વત્ફણિફણમણિભામણ્ડલીમણ્ડ્યમાના ।
નાસારાયા યમારેરપિ સરતિ યયા પ્રાણવાયુઃ સદા સા
નાસાસ્માન્ વ્યાઘ્રગેહેશિતુરવતુ ચિરં ચિન્મયસ્યાતિચિત્રા ॥ ૬૬॥

આદિત્યાકારમાદ્યં જનયતિ દિવસં ચન્દ્રરૂપં દ્વિતીયં
મેદિન્યામત્ર રાત્રિં રચયતિ મુહુરપ્યગ્નિરૂપં તૃતીયમ્ ।
કાલં સન્ધ્યાભિધાનં કલયતિ જગતાં ભૂતયે યેષુ તેભ્યઃ
કાલારે વ્યાઘ્રગેહત્રિપુરવિજયિનો વીક્ષણેભ્યો નમોઽસ્તુ ॥ ૬૭॥

બ્રહ્મણ્યં બન્ધહીનં દ્રુહિણહરિહરાતીતમાદ્યન્તશૂન્યં
બ્રહ્મ વ્યાઘ્રાલયસ્થં પ્રકટયતિ યયા સ્વીયમૈશ્વર્યમસ્યૈ ।
દૃષ્ટિત્રય્યૈ નમોઽસ્તુ ત્રિપુરવિજયિનસ્ત્રીક્ષણસ્ય ત્રિલોકી
સૃષ્ટિસ્થિત્યન્તકૃત્ત્રીશ્વરવિષયજુષે વિશ્વભૂતિપ્રદાત્ર્યૈ ॥ ૬૮॥

ચિલ્લીલીલાલવોત્થાપિતવિલસદસત્પ્રાયમાયાપ્રપઞ્ચં
મલ્લીબાણાદિભસ્મીકરણચણતૃતીયેક્ષણોદ્ભાસમાનમ્ ।
ચિલ્લીનસ્યાષ્ટમૂર્તેરવતુ ચિરમરં વ્યાઘ્રગેહેશિતુઃ શ્રી-
મલ્લારીડ્યસ્ય શમ્ભોરલિકતલમલીકાકુલં મામજસ્રમ્ ॥ ૬૯॥

ભ્રૂવલ્લીલાસ્યરઙ્ગં ભુવનજનમનઃ ક્ષોભદં ભૂતિદિગ્ધં
ધાવલ્યાવલ્યગારં તિલકમિવ તલેનાગ્નિનેત્રં દધાનમ્ ।
સાવણ્યાતીતવર્ણોજ્જ્વલસજલજટાજૂટસઞ્જાતનાના-
લાવણ્યૈકાલવાલં સ્મરતુ મમ મતિર્વ્યાઘ્રગેહેશફાલમ્ ॥ ૭૦॥

પ્રાગદ્ભિર્વિશ્વમમ્ભોમયમિદમખિલં કર્તુકામેવ વેગ-
પ્રાગલ્ભ્યચ્યાવિતોચ્ચાવચમકરમહામત્સ્યનક્રોરગાભ્રાત્ ।
ભાગીરથ્યાત્તપાતા મહિતલમગતા માર્ગમધ્યે યદન્ત-
ર્ભાગગ્રસ્તા જટાટવ્યવતુ ભગવતો વ્યાઘગેહેશિતુર્મામ્ ॥ ૭૧॥

સારા સા દિવ્યસિન્ધુર્યદુદરસરસીભાવમાપ્યાપિ ભીમાન્-
સારાસાન્ સર્વસિન્ધુપ્રચુરિતસલિલાન્ સપ્તસિન્ધૂનપીમાન્ ।
સારઙ્ગાદ્યુગ્રયાદોમુખરિતજલભૂમ્નાત્યધઃકુર્વતીન્ધે ।
સારં ગુર્વી જટાટવ્યવતુ ભગવતો વ્યાગ્રગેહેશિતુર્મામ્ ॥ ૭૨॥

દર્પાન્ધાબન્ધસર્પપ્રવરનિકરશૂત્કારવાતૌઘઘૂર્ણ-

ત્કલ્પાન્તામ્ભોધિકલ્પદ્યુસરિદુદકસઙ્ઘોષસમ્પૂર્ણગર્ભમ્ ।
કોટિશ્લિષ્ટાન્તરિક્ષં વિવિધવિધિશિરોમુણ્ડકોટીકુટીરં
કોટીરં વ્યાઘ્રગેહેશિતુરતિરુચિરં ચિન્તયામીન્દુચિહ્નમ્ ॥ ૭૩॥

ગર્ભે ગાઙ્ગં પ્રગલ્ભં પ્રલયજલનિધિપ્રાયમમ્ભઃ સશબ્દં
બિભ્રન્નીશેચ્છયોપર્યપરિપિઠરવદ્બ્રહ્મમુણ્ડાંશ્ચ પીનાન્ ।
બદ્ધત્વાત્ સર્પસઙ્ઘાન્ બહિરપિ મુકુટે મુગ્ધમિન્દું કપર્દો
બુદ્ધિવ્યામોહકારી ભવતિ શિવશિવ વ્યાઘ્રગેહેશભૂમા (ભૂમ્ના) ॥ ૭૪॥

પ્રેઙ્ખત્પ્રાચીનમુણ્ડપ્રકરસહચરાસઙ્ખ્યગઙ્ગાતરઙ્ગ
પ્રેઙ્ખાખેલત્કિરીટામૃતકિરણમહોમોહિયાદઃકદમ્બમ્ ।
દૃપ્તૈર્દર્વીકરેન્દ્રૈર્દૃઢપરિકલિતં તપ્તતામ્રાભમાભા
લિપ્તાશં વ્યાઘ્રગેહત્રિપુરહરસટાબન્ધમન્તઃ સમીક્ષે ॥ ૭૫॥

શ્રીમન્મુગ્ધેન્દુચૂડં જલમુખરજટાજૂટજુષ્ટં ત્રિનેત્રં
નાસાલક્ષ્મીવિલાસોજ્જ્વલમુખકમલશ્રીલસન્નીલકણ્ઠમ્ ।
ભૂયો ભૂયો ભુજઙ્ગાઙ્ગદભુજગમૃગાદ્યઞ્ચિતં ચિન્તયેઽહં
હારીભૂતોરગોરઃ સ્થલમુદરકૃશં વ્યાઘ્રગેહેશદેહમ્ ॥ ૭૬॥

કૃત્તાર્તિ કૃત્તિચેલાકલિતકટિતટં સર્પકાઞ્ચીકલાપં
ચારૂરૂં સુજાનું સુજનજનનભિત્સુન્દરાકારજઙ્ઘમ્ ।
પાદાગ્રીદનભઙ્ગયશ્રિતમમલનખં રાગરન્યોદરાઙ્ઘ્રિં
વન્દેઽહં દેહમૈશં મુહુરતિસુભગં વ્યાઘ્રગેહસ્થમાદ્યમ્ ॥ ૭૭॥

ભાસ્વદ્ભસ્માઙ્ગરાગાધિકધવલિતસર્વાઙ્ગમયઙ્ઘ્રિમૂલે
દોસ્સીમસ્વોષ્ઠબિમ્બેઽપ્યરુણિમકલિતં કણ્ઠનાલેઽતિકાલમ્ ।
ભાસ્વત્સોમાગ્નિનેત્રોપરિ શિરસિ જટાજૂદલક્ષ્મ્યા લસન્ત્યા
લાસ્યેનાનન્દદં મે હૃદિ મુહુરુદિયાદ્વ્યાઘ્રગેહેશગાત્રમ્ ॥ ૭૮॥

પાતાલાઙ્ઘ્રિં વરોવીર્વલયકટિતટં સત્યલોકોત્તમાઙ્ગં
પાતારં વિષ્ટપાનાં પરિકલિતવિરાડાત્મના ચાનુવેલમ્ ।
પાતિવ્રત્યેન ચિન્તા ભજતુ મમ મહાપાપાપાકોપજાતાત્
પાતિત્યાત્તૂર્ણસુત્તારયતુ ચ કૃપયા વ્યાઘ્રગેહેશ્વરો મામ્ ॥ ૭૯॥

શૈવં પાદાદિ કેશાવધિ વપુરથ કેશાદિપાદાવસાનં
ચૈવં સંસ્તૂય ભૂયો હૃદયભુવિ સમાધાય સઞ્ચિન્ત્ય ભક્ત્યા ।
કૈવલ્યં પ્રાર્થયામો મુહુરમિતદયં વ્યાઘ્રગેહસ્થમાદ્યં

દૈવં દ્રાક્ નોઽકૂલં ભવતુ ભવભયાપાયદાનન્દરૂપમ્ ॥ ૮૦॥

સત્સઙ્ક્રાન્ત્યુત્સવાષ્ટમ્યભિનવશિવરાત્રયાદિકાલેષુ મન્યે
યત્સાયુજ્યં પ્રયાતાસ્ત્રિભુવનજનતાઃ સમ્યગમ્ભોજજન્મા ।
વત્સસ્તેયેન કૃષ્ણાત્ પુનરધિગતયા પુષ્ટયા સૃષ્ટિશક્ત્યા
ચિત્સ્વચ્છાત્મા ચરીકર્ત્યવતુ સ ભગવાન્ વ્યાઘ્રગેહેશ્વરો મામ્ ॥ ૮૧॥

ધર્માર્થૌ કામમોક્ષાવપિ ભુવિ પુરુષાર્થા હિ તેષ્વર્થકામૌ
જન્મોપેક્ષ્યાપિ ગૃહ્ણન્ત્યલમખિલજના જીવિતાદપ્યભીષ્ટૌ ।
ધર્મો મોક્ષશ્ચ શ્વ ધાત્રયામધિકમશરણૌ ણાઃ તદ્દ્વયાર્થં યતન્તે
સમ્યગ્વ્યાઘ્રાલયાધીશ્વરકૃતકૃપયા યત્ર તેભ્યો નમોઽસ્તુ ॥ ૮૨॥

નિત્યન્યાયાર્જિતા યૈરધિકતમમનઃશુદ્ધિપૂર્વં વિધેયો
મત્યૈર્ધર્મસ્તદર્થં વિદધતિ વિવિધાધર્મવૃન્દં વૃથાન્ધાઃ ।
પૃથ્વયાં વ્યાઘ્રાલયાધીશ્વરપુરહરમુદ્દિશ્ય યૈર્દિશ્યતેઽન્નં
પથ્યં ભક્ત્યા યથાશક્ત્યતિથિષુ હૃદિ તાન્ કુર્મહે ધર્મશીલાન્ ॥ ૮૩॥

મોક્ષોપાયેષુ મુખ્યં ત્રયમિહ ભગવત્પ્રાપકં પ્રાકૃતાનાં
સાક્ષાજ્જ્ઞાનં ચ સત્કર્મ ચ મદનરિપૌ પુંસિ ભક્તિશ્ચ ભદ્રા ।
રાક્ષસ્યા શિક્ષયા સ્યાદનવધિજનિભિર્જ્ઞાનમર્થાદ્યશુદ્ધ્યા
રૂક્ષં કર્માપિ ભાક્તિર્ભવતુ મમ ભૃશં વ્યાઘ્રગેહાધિનાથે ॥ ૮૪॥

તર્કગ્રન્થાન્તરાણામતિકઠિનતયા દુર્ગમો જ્ઞાનયોગો
નિષ્કામઃ કર્મયોગો ભગવતિ નિહિતો દુષ્કરઃ કિઞ્ચ તાભ્યામ્ ।
ભૂયાન્નાનાભવાન્તે ત્રયસુલભતમે ભક્તિયોગેઽધિકારો
ભૂયાન્ સ વ્યાઘ્રગેહત્રિનયનકરુણાપાઙ્ગપાતેન મે સ્યાત્ ॥ ૮૫॥

ગીતાદીનામગાધાદતિશયવિશદં યસ્ય નારાયણીયે
ગીતં જ્ઞાનાદિયોગત્રયગુણગણને સામ્યભાજોઽપ્યસામ્યમ્ ।
ભીતાનાં માદૃશાનાં ગતિરિહ યમૃતે નાસ્તિ તં ભક્તિયોગં
ભૂતાનામેકબન્ધુર્વિતરતુ ભગવાન વ્યાઘ્રગેહેશ્વરો મે ॥ ૮૬॥

બાહુશ્રુત્યં તપશ્ચ વ્રતકુલમખિલં બ્રહ્મચર્યં ચ વાચાં
યાહુલ્યેનાલમૈન્દ્રં સદનમપિ વિફલં યાં વિના યાં પ્રસિદ્ધામ્ । (બાહુલ્યે)
પ્રાહુઃ પ્રેમસ્વરૂપાં ત્રિજગતિ મુનયો મુક્તિમાપ્તાઃ પુરા યા-
મૂ હુસ્તાં ભક્તિમાશુ પ્રદિશતુ ભગવાન્ વ્યાઘ્રગેહેશ્વરો મે ॥ ૮૭॥

જાયાદાયાદવિત્તાદિષુ વિગતદયેષ્વત્યધઃપાતપાશ-
    પ્રાયા માયામયેષુ સ્વયમદયતિ યા સૈવ દેવે દયાબ્ધૌ ।
જાયેત વ્યાઘ્રપુયાં વસતિવિષયભેદોદ્ભવદ્ભક્તિસંજ્ઞા
    સાયુજ્યસ્યાપિ દોગ્ધ્રી સપદિ મમ રતિઃ કાપિ સર્વાર્થસિદ્ધ્યૈ ॥ ૮૮॥

ભક્તિઃ પ્રેમૈવ હિ પ્રેમ ચ સુભગજનેષૂચિતં દુર્ભગસ્ત્રી-
    સક્તાસ્તત્સૌભગાબ્ધૌ ભગવતિ સુકરં સ્ત્રીષુ કૃચ્છ્રેણ કૃત્વા ।
ભુક્તેશ્ચાધઃપતન્તીશ્વરવિમુખતયા તાદૃશો મા સ્મ ભૂવં
    ભક્તાનાં સઙ્ગમો મે ભવતુ ચ સતતં વ્યાઘ્રગેહેશભાજામ્ ॥ ૮૯॥

સત્સઙ્ગાવાપ્તભક્તિર્ભ ગ વતિ હૃદયં ન્યસ્ય હૃદ્યષ્ટમૂર્તે-
    રુત્સઙ્ગારૂઢગૌરીકરકલિતપરિષ્વઙ્ગમઙ્ગં સગઙ્ગમ્ ।
ચિત્સ્વચ્છં વ્યાઘ્રગેહસ્થિતમતિમહિતં ચિન્તયન્ ભસ્મધૂલી-
    ભૃત્સ્વચ્છન્દં ચરેયં ચિરમિહ શિવરામાદિનામાનિ ગાયન્ ॥ ૯૦॥

નામ્નાં નાનાકથાનામપિ નિશમનયા યોદિતાભાગ્યભાજા
    મામ્નાયાચાર્યબોધાદપિ પરમતમન્તત્વસૂક્ષ્મં પ્રસૂતે ।
ધામ્ના સંસારતાપસ્ત્રિજગતિ પરમાનન્દતામેતિ યસ્યા
    ભૂમ્ના કિં વ્યાઘ્રગેહાધિપમુપરિ તતો ભક્તિતોઽન્યં ન યાચે ॥ ૯૧॥

કર્મજ્ઞાનાદિકક્ષ્યા દુરધિગમતમં સમ્મતં સામ્યહીનં
    બ્રહ્મજ્ઞાનં પ્રસૂતે બત ભુવિ બધિરસ્યાપિ યા પાતમાત્રે ।
ધર્મજ્ઞાનાં જનાનાં જનિમૃતિહનને જાગ્રતીસ્તા વૃણેઽહં
    બ્રહ્મઘ્નામપ્યઘઘ્નીં વ્યસનનિરસનીં વ્યાઘ્રગેહેશભક્તિમ્ ॥ ૯૨॥

યલ્લાભે ભાગ્યમાજામહિજગદવનીચક્રમેકાતપત્રં
    સ્વલોકશ્ચ સ્વયં દ્રાગહમહમિકયા પાહિ પાહીત્યભીક્ષ્ણમ્ ।
સંલ્લાપૈઃ પાદમૂલે પતતિ હિ તરસા પારમેષ્ઠ્યેન સાકં
    દુર્લભ્યાશૈવ તસ્યૈ સતતમપિ નમો વ્યાઘ્રગેહેશભક્ત્યૈ ॥ ૯૩॥

નિઃસ્વઃ પાપોઽપિ નેચ્છામ્યહમવનિમિમાં નાપિ વસ્વૌકસારાઃ
    ન સ્વર્ગં નાપવર્ગં ન નરકહરણં ચાર્થયે ચાર્થમેકમ્ ।
સસ્વાતન્ત્ર્યો ભવેયં પ્રતિભવમિતયા વ્યાઘ્રગેહેશભક્ત્યા
    દુઃસ્વપ્નપ્રાયમઙ્ગં જગદપિ સકલં વિસ્મરન્નાસઞ્ચરેયમ્ ॥ ૯૪॥

સોઽહં દેહાત્મબુદ્ધિદ્રઢિમદમદનેન્ધાનમાહાત્મ્યમાયા-
    મોહાન્ધો ગેહગેહાધિકગહનતયા સાહસેનાભિભૂયે ।

દ્રોહવ્યૂહાવગાઢવ્યસનમકલયન્ વ્યાઘ્રગેહેશભક્ત્યા
    સો મો હાપોહં સુસૂક્ષ્મં મનસિ ભગવતસ્તત્ત્વમુદ્ભાવયેયમ્ ॥ ૯૫॥

દારિદ્ર્યૈયવર્યાધિભિશ્ચાધિભિરપિ વિવિધૈઃ શત્રુભિશ્ચાભિભૂયે
    દારદ્રવ્યાધિચૌર્યેચ્છભિરતિપિશુનૈર્દામ્ભિકૈઃ કાલશક્ત્યા ।
કારુણ્યાર્દ્રૈઃ સુહૃદ્ભિર્ગુરુભિરપિ દુરાત્મેતિ દૂરીક્રિયેઽસ્યાં
    કારયાં વ્યાઘ્રગેહત્રિનયનકરુણાપાતકાલં પ્રતીક્ષે ॥ ૯૬॥

ભાવે ભાવે ભવાનીપતિભજનમહાવાસના મેઽસ્તુ માતા
    દેવસ્તાતો ગુરુશ્ચાસ્ત્વિહ મમ સુહૃદઃ સન્તુ ભક્તાઃ સહસ્રમ્ ।
ભક્તિર્ભાર્યાસ્તુ પુત્રો ભવતુ ભગવતસ્તત્ત્વબોધો બુધૈશ્ચ
    ત્યક્તો મા ભૂવમેવં વ્યસનિનમવતાવ્યાઘ્રગેહેશ્વરો મામ્ ॥ ૯૭॥

વ્યક્તં વ્યામોહદં ચ વ્યસનમિતમિદં સામ્પ્રતં મે ચિરાય
    ત્યક્તં યેનેશ્વરારાધનમતિકઠિનાનીશ્વરારાધનાર્થમ્ ।
ધિક્ તં માં સ્ત્રૈણમન્ધં મુખરયતિ મુદા યઃ સ્વભક્ત્યર્થમિત્થં
    ભક્તઃ સ્યાં વ્યાઘ્રગેહત્રિપુરવિજયિનસ્તસ્ય સર્વાત્મનાહમ્ ॥ ૯૮॥

કલ્પાદ્યુત્પન્નમેતત્રિભુવનમખિલં યસ્પદામ્ભોજધૂલી-
    કલ્પં મન્યે મહત્ત્વં મધુરિપુરપિ નો વેદ સાક્ષાધતી દી યમ્ ।
સ્વઃપાતાજો હરિર્યઃ સ્વયમપિ ભગવાન્ યત્કલા યસ્ય ભૂમ્નઃ
    સ્વલ્પા દેવાશ્ચ ભક્ત્યા સતતમપિ ભજે વ્યાઘ્રગેહેશ્વરં તમ્ ॥ ૯૯॥

વેદે શાસ્ત્રે પુરાણાદિષુ ચ બહુવિધં વર્ણ્યતે વસ્તુ નામ્નાં
    ભેદેનાભિન્નમેકં યદિહ હરિહરબ્રહ્મશક્રાદયોઽમી ।
યે દેવાસ્તે તદંશાઃ કિમુ પુનરપરે કૃષ્ણરામાર્જુનાદ્યા
    મોદાયોદેતુ તત્ત્વં મનસિ તદનિશં વ્યાઘ્રગેહસ્થિતં મે ॥ ૧૦૦॥

ગાત્રં કૈલાસગોત્રપ્રભવમપિ હૃતં યસ્ય શાસ્ત્રેણ નેત્રં
    શ્રોત્રં વેદેન લૂનં રસનમપિ પુરાણેન નૂનં ક સોઽહમ્ ।
સ્તોત્રં ક્વાહો પવિત્રં પરતરભગવદ્ભક્તિમાહાત્મ્યપાલી-
    પાત્રં વ્યાઘ્રાલયાધીશ્વરશતકમિદં કસ્ય કાવ્યં ન જાને ॥ ૧૦૧॥

॥ ઇતિ શ્રીવ્યાઘ્રાલયેશશતકં સમ્પૂર્ણમ્ ॥

Proofread by Gopalakrisnan

*shrIvyAghrAlayeshashatakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*